देवा अपि न जानन्ति अन्तं कुत्र तिष्ठति ।
मम मायानियोगेन तिष्ठते श्चौषधं वने ॥
लोके ह्येवं विजानाति राजा पालयते प्रजाः ।
राजमायामहं कृत्वा पालयामि वसुन्धराम् ॥
ये तु वै द्वादशादित्या उद्देष्यन्ति युगक्षये ।
प्रविश्य तानहं भूमे ! मायां लोके सृजाम्यहम् ॥
वर्षेण पांशुना भूमिर्लोकेषु यतते सदा ।
मायां पांशुमयीं कृत्वा पूरयाम्यखिलं जगत् ॥
वर्त्तते यत्र संवर्त्तो धाराभिर्मुषलाकृति ।
मायां सावर्णकीं गृह्य पूरयाम्यखिलं जगत् ॥
यत् स्वपामि वरारोहे ! शेषस्योपरि वारिणि ।
अनन्तमायया चाहं धारयामि स्वपामि च ॥
वराहमायामादाय भूमे ! जानामि किन्न वै ।
देवा यत्र निलीयन्ते सा माया मम कीर्त्तिता ॥
त्वञ्चापि वैष्णवीं मायां कृत्वा जानासि किन्न
तत् ।
धारितासि च सुश्रोणि ! वारान् सप्तदशैव तु ॥
माया तु मम देवीयं कृत्वा ह्येकार्णवां महीम् ।
मम मायाबलं ह्येतद्येन तिष्ठाम्यहं जले ॥
प्रजापतिं शतं रुद्रं सृजामि च हरामि च ।
तेऽपि मायां न जानन्ति मम मायाविमो-
हिताः ॥
अथ पितृगणाश्चैव य एते सूर्य्यवर्च्चसः ।
मायां पितृमयीं ह्येतां गृह्णामि हि च तत्त्वतः ॥
किन्तु मायैव सुश्रोणि ! अन्यच्च शृणु
सुन्दरि ! ॥”
इति वाराहे मायाचक्रम् ॥ *॥
अथ मायास्तोत्रम् ।
शौनक उवाच ।
“शशिध्वजो महाराजः स्तुत्वा मायां गतः
क्कतः ।
का वा मायास्तुतिः सूत ! वद तत्त्वविदांवर ! ।
या त्वत्कथा विष्णुकथा वक्तव्या सा विशुद्धये ॥”
सूत उवाच ।
“शृणुध्वं मुनयः सर्व्वे मार्कण्डेयाय पृच्छते ।
शुकः प्राह विशुद्धात्मा मायास्तवमनुत्तमम् ॥
तत् शृणुष्व प्रवक्ष्यामि यथाधीतं यथाश्रुतम् ।
सर्व्वकामप्रदं नॄणां पापतापविनाशनम् ॥”
शुक उवाच ।
“भल्लाटनगरं त्यक्त्वा विष्णुभक्तः शशिध्वजः ।
आत्मसंसारमोक्षाय मायास्तवमलं जगौ ॥”
शशिध्वज उवाच ।
“ॐ ह्रींकारां सत्त्वसारां विशुद्धां
ब्रह्मादीनां मातरं वेदबोध्याम् ।
तन्वीं स्वाहां भूततन्मात्रकक्षां
वन्दे वन्द्यां देवगन्धर्व्वसिद्धैः ॥
लोकातीतां द्वैतभूतां समीडे
भूतैर्भव्यां व्याससामासिकाद्यैः ।
नानारूपैर्देवतिर्य्यङ्मनुष्ये-
स्तामाधारां ब्रह्मरूपां नमामि ॥
यस्या भासा त्रिजगद्भाति भूतै-
र्न भात्येतत्तदभावे विधातुः ।
विद्योतितां कालकल्लोललोलां
लीलापाङ्गीं क्षिप्तसंसारदुर्गाम् ॥
पूर्णां प्राप्यां द्वैतलभ्यां शरण्या-
माद्ये शेषे मध्यतो या विभाति ।
कालो दैवं कर्म्म सोपाधयो ये
तस्यां तासां तां विशिष्टां नमामि ॥
भूमौ गन्धो रसतापसु प्रतिष्ठा
रूपं तेजस्येव वायौ स्पृशत्वम् ।
खे शब्दो वै यच्चिदा भाति नाना
तामाद्यां तां विश्वरूपां नमामि ॥
सावित्री त्वं ब्रह्मरूपा भवानी
भूतेशस्य श्रीपतेः श्रीस्वरूपा ।
शची शक्रस्यापि नाकेश्वरस्य
पत्नी श्रेष्ठा भासि माये ! जगत्सु ॥
बाल्ये बाला युवती यौवने त्वं
वार्द्धक्ये या स्थविरा कालकल्पा ।
नानाकारैर्योगयोगैश्च धर्म्मो
भक्त्या वै त्वं कामवश्या विभासि ॥
वरेण्या त्वं वरदा लोकसिद्धा
साध्वी धन्या लोकमान्या सुकन्या ।
चण्डी दुर्गा कालिका कालिकाख्या
नानादेशे रूपवेशैर्विभासि ॥
तव चरणसरोजं देवि ! देवादिवन्द्यं
यदि हृदयसरोजे भावयन्तीह भक्त्या ।
श्रुतियुगकुहरे वा संश्रुतं धर्म्मसम्पत्
शुकशतमतिशुद्धं हृत्सरोजे स्मरन्ति ॥
जनयति जगदाद्ये सर्व्वसिद्धिञ्च तेषाम् ॥
मायास्तवमिदं पुण्यं शुकदेवेन भाषितम् ।
मार्कण्डेयादयश्चापि सिद्धिं लेभे शशिध्वजः ॥
कोकामुखे तपस्तप्त्वा हरिं ध्यात्वा वना-
न्तरे ।
सुदर्शनेन निहतो वैकुण्ठशरणं ययौ ॥”
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये माया-
स्तव कथनं त्रिंशोऽध्यायः ॥ (शक्तिः सामर्थ्यं वा ।
यथा, ऋग्वेदे । ४ । ३ । २१ ।
“दासानामिन्द्रो मायया ।”
“मायया स्वकीयया शक्त्या ।” इति तद्भाष्ये
सायणः ॥)

मायाकारः, पुं, (मायां इन्द्रजालव्यापारं करो-
तीति । कृ + अण् ।) ऐन्द्रजालिकः । वाजी-
कर इति भाषा । तत्पर्य्यायः । प्रातिहारिकः
२ । इत्यमरः । २ । १० । ११ ॥ मायां स्थल-
जलादौ जलस्थलादिज्ञानं करोतीति माया-
कारः अण् । प्रतिहरणं प्रतिहारो व्याजः भावे
घञ् स प्रयोजनमस्य प्रातिहारिकः ठञ्
ठस्ये क्रिरिति वृद्धिः । प्रतिहारक इत्यपि
पाठः । तत्र प्रति प्रथमं सुष्ठु मनो नयने च
हरति ज्ञाते न किञ्चिदिति प्रतिहारकः ।
ण्वकान्तात् स्वार्थे ष्णे प्रातिहारकश्च ष्णि प्रति-
हारश्च । इति तट्टीकायां भरतः ॥

मायाकृत्, पुं, (मायां स्थलजलादौ जलस्थलादि
ज्ञानं करोति कारयतीति । कृ + क्विप् । तुगा-
गमश्च । करोतिरत्रान्तर्भूतण्यर्थः ।) माया
कारः । यथा,—
“शाम्बरी साम्बरी माया मायाकृत् भिक्षुके
नटे ।”
इति शब्दरत्नावली ॥

मायाजीवी, [न्] पुं, (मायया इन्द्रजालविद्यया
जीवति जीवनयात्रां सम्पादयति इति ।
जीव + णिनिः ।) प्रातिहारिकः । इति हेम-
चन्द्रः । ३ । ५८६ ॥

मायातिः, पुं, (मायया सह अतति । यद्वा, मा
अततीति । अत + “अन्यतिभ्यां च ।” उणा०
४।१३०। इति इञ् ।) नरबलिः । यथा,—
“मायातीनाञ्च निर्य्यातं श्रूयतां मुनिसत्तम ! ।
यच्चाम्यथर्व्ववेदोक्तं फलहानिर्य्यतिक्रमे ॥
पितृमातृविहीनञ्च युवकं व्याधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
अजारिजं विशुद्धञ्च सच्छूद्रं मूलकं वरम् ।
तद्बन्धुभ्यो धनं दत्त्वा क्रीतं मूल्यातिरेकतः ॥
स्नापयित्वा च तं धर्म्मी संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तञ्च वर्षं भ्रामयित्वा चरदारेण यत्नतः ।
वर्षान्ते च समुत्सृज्य दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्यान्मायातिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥
बलिं दत्त्वा च स्तुत्वा च धृत्वा च कवचं बुधः ।
प्रणम्य दण्डवद्भूमौ दद्याद्विप्राय दक्षिणाम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६६ अध्यायः ॥

मायादः, पुं, (मायया छलेन धूर्त्तत्वेन अत्ति
भक्षयतीति । अद + अण् ।) कुम्भीरः । इति
त्रिकाण्डशेषः ॥

मायादेवीसुतः, पुं, (मायादेव्याः सुतः ।) बुद्धः ।
इत्यमरः । १ । १ । १५ ॥

मायाफलं, क्ली, फलविशेषः । माइफल इति
भाषा । तत्पर्य्यायः । मायिफलम् २ मायिकम् ३
छिद्रफलम् ४ मायि ५ । अस्य गुणाः । वात-
हरत्वम् । कटुत्वम् । उष्णत्वम् । शोथिल्यसङ्को-
चकत्वकेशकार्ष्ण्यदायित्वञ्च । इति राजनिर्घण्टः ॥

मायामोहः, पुं, (मायया मोहयति असुरानिति ।
मुह + णिच् + अच् । माया च मोहश्च तौ
यस्येति वा ।) विष्णुदेहनिर्गतासुरमोहक-
पुरुषविशेषः । यथा,—
श्रीपराशर उवाच ।
“इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः ।
समुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान् ॥”
श्रीभगवानुवाच ।
“मायामोहोऽयमखिलान् दैत्यांस्तान्
मोहयिष्यति ।
ततो वध्या भविष्यन्ति वेदमार्गबहिष्कृताः ॥
स्थितौ स्थितस्य मे वध्या यावन्तः परिपन्थिनः ।
ब्रह्मणो येऽधिकारस्य देवदैत्यादिकाः सुराः ॥
तद्गच्छत न भीः कार्य्या मायामोहोऽयमग्रतः ।
गच्छन्नद्योपकाराय भवतां भविता सुराः ॥”